१३	२४१	शिशुपालवधम् टीकोपेतम्	दत्तकात्मज-माघकवि वल्लभदेवः	३७५	इदं हस्तलिखितं भूर्जपत्रात्मकं पुस्तकं शारदाक्षरलिपिकम् अतिप्राचीनं जरदवस्थाकम्, आदितः पञ्च पत्राणि विनष्टानि, अन्तरान्तरा अन्तेऽपि पत्राणि विनष्टानि।
१४	२५८	हास्यार्णवप्रहसनम्	जगदीश्वरकविः	३०	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नवीनावस्थं संपूर्णम् ।

नीतिग्रन्थाः

सं०	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्रसं०	विवरणम्
१५	२७३	आह्निकपद्धतिः	दुर्गादत्तात्मज-नव्य-चण्डीदासः	१०८	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं संपूर्णम् ।
१६	२७४	सैव	,,	१०७	,,
१७	२७५	कामन्दकीय-नीतिसारः भाषोपेतः	कामन्दकिः	१४१	,,

१८	२९२	पदातिशिक्षा	रणवीरसिंहकारिता	७०	१ म भाग: । हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नवीनं संपूर्णम् इंग्लिशभाषानुवादसहितं भाषायां विरचितविवरणम् ।
१९	२९३	रयन्त्रशिक्षा	,,	२७५	,, (रयन्त्राभ्यास २९४ बद्धम्) ।
२०	२९४	रयन्त्राभ्यास:	,,	१८४	,,
२१	३००	समुदायशिक्षा (सैन्यशिक्षा)	,,	७४	,,
२२	३०१	हितोपदेश: विषमपदव्याख्योपेत:	विष्णुशर्मा तारानाथशर्मा	२०६	,, तालपत्रसमानाकारम् ।

धर्मशास्त्रग्रन्था:

२३	३०६	अपरार्क:	अपरादित्य:	३८२	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नवावस्थाकम् अपूर्णं (ग्रहशान्तिप्रकरणान्त: प्रथमोऽध्याय:) ।
२४	३३४	द्वादशीव्रतनिर्णय:	....	१	भूर्जपत्रात्मकं पुस्तकमिदं हस्तलिखितं शारदाक्षरलिपिकं अतिप्राचीनं जरद्वस्थाकं (निर्णयामृत ३२८ बद्धम्) ।
२५	३२८	निर्णयामृतम्	गोपीनारायण:	१११	भूर्जपत्रेषु हस्तलिखितमिदं पुस्तकं शारदाक्षरलिपिकं अतिजरद्वस्थाकम्, आदित: ६४ पत्राणि विनष्टानि, कतिचित् खण्डशो जीर्णच्छिन्नानि ।
२६	३३५	मनुस्मृति: मूलमात्रम्	मनु:	८९	,, (निर्णयामृत ३२८ बद्धम्) ।
२७	३४२	महार्णवनिबन्ध: (कर्मविपाक:)	मदनसूनुमांधातृनृपकारित:	३९२	हस्तलिखितमिदं देवनागराक्षरलिपिकं नवीनम् असंपूर्णम् ।
२८	३६७	रणवीरव्रतरत्नाकर:	रणवीरसिंहकारित:	४७५	,, १ म भाग: । संपूर्णं नवीनम् । ग्रन्थविरचनकाल: संवत् १९२२ ।
२९	३६८	स एव	,,	४७१	,, २ य भाग: ।
३०	३६९	स एव	,,	५३६	,, ३ य भाग: ।

सख्या	ग्रन्थांकः	ग्रन्थनाम	कर्तृनाम	पत्रसं.	विवरणम्
३१	३७३	विष्णुस्मृतिः	विष्णुः	५६	इदं पुस्तकं भूर्जपत्रेषु हस्तलिखितं शारदाक्षरलिपिकम् अतिजरदवस्थाकं प्राचीनतरं संपूर्णम् (निर्णयामृत ३२८ अनुबद्धम)।
३२	३७४	विष्णुस्मृतिपर्यायः	....	६	,, ६७, ९०, ९८ प्रकरणानां पर्यायमात्रमेतत् (निर्णयामृत ३२८ अनुबद्धम)।

कर्मकाण्डग्रन्थाः

सख्या	ग्रन्थांकः	ग्रन्थनाम	कर्तृनाम	पत्रसं.	विवरणम्
३३	३९६	अनन्तपूजा	....	१	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नवीनमसंपूर्णम् (नित्यहोमविधि ४४० बद्धम्)।
३४	४२७	चतुर्विंशतिगायत्री	....	२६	,, नवं संपूर्णम् (गणेशस्तात्र ११२९ बद्धम्)।
३५	४२८	सैव	....	३६	,,
३६	४३१	नवग्रहमन्त्राः	....	६	,, (नित्यहोमवि० ४४० बद्धम्)।
३७	४३८	नित्यहोमविधिः	....	६	,, (गणेशस्तोत्र ११२९ बद्धम्)।
३८	४३९	स एव	....	१०	,, तालपत्रात्मकम्
३९	४४०	स एव	....	४	,,
४०	४४१	स एव	....	१२	,, सनवग्रहमन्त्रः (संध्याप्रयोग० ४८६ बद्धः)।
४१	४४६	प्रातःकृत्यम्	शंकरः	७	,, (नित्यहो० ४४० बद्धम्)।
४२	४४९	मूलशान्तिः	शौनकः	४५	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपकं प्राचीनं जरदवस्थाकं तालपत्रसमानाकारम् ।
४३	४५०	सैव	....	४	,, असंपूर्णम् ।

४४	४६६	लक्ष्मीपूजाविधिः	....	६	” नवीनं संपूर्णम् (गणेशास्तो० ११३९ बन्द्धम्)
४५	४६८	विवाहपद्धतिः टीकोपेता	शौनकः हलायुधः	३२	” प्राचीनं जरद्वस्थाकं संपूर्ण तालपत्रसमानपत्रकम् ।
४६	४६९	सैव	”	६	” असंपूर्णम् ।
४७	४७२	शिवपूजनम्	बौधायनः	१९	” नवीनं संपूर्णम् ।
४८	४७३	तदेव	”	१९	” तालपत्रसमाकृतिकम् ।
४९	४७४	तदेव	”	१८	”
५०	४७५	श्राद्धकण्डी	....	४	इदं भूर्जपत्रेषु हस्तलिखितं पुस्तकं शारदाक्षरलिपिकमतिप्राचीनतरं जरद्वस्थाकं संपूर्णम् (निर्णयामृत ३२८ बन्द्धम्) ।
५१	४७६	षोडशोपचार ऋङ्मन्त्राः	....	६	हस्तलिखितं पुस्तकं देवनागरालिपिकं नूतनं संपूर्णम् ।
५२	४७७	त एव	....	६	” (नित्यहो० ४४० बन्द्धम्) ।
५३	४७८	त एव	....	१२	” (संध्याप्रयो० ४८६ बन्द्धम्) ।
५४	४७९	त एव	....	६	” (गणेश० ११३९ बन्द्धम्) ।
५५	४८१	संध्याप्रयोगः	....	१०	” (गणेशस्तो० ११३९ बन्द्धम्) ।
५६	४८२	स एव	....	१८	”
५७	४८३	स एव	....	११	” तालपत्रात्मकम् ।
५८	४८४	स एव	....	१२	”
५९	४८५	स एव	....	१२	”
६०	४८६	स एव	....	२२	”

वेदान्तादिग्रन्थाः

सं.	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्रसं.	विवरणम्
६१	५०८	ईश्वरप्रत्यभिज्ञा विवृतिविमार्शिनीसमेता	उत्पलदेवः अभिनवगुप्तः	१९९	इदं पुस्तकं भूर्जपत्रेषु हस्तलिखितं शारदाक्षरलिपिकं जरदवस्थाकमसंपूर्णम् आद्यन्तभागयोस्त्रुटितत्वात् । अतिप्राचीनम् ।
६२	५५०	भगवद्गीता	महर्षिर्व्यासः	३०३	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नवीनावस्थं विंशत्यालेख्यै-रन्तरान्तरा समलंकृतं संपूर्णम् । प्रतिपत्रं विविधवर्णोपचिताभिः चतुरस्रलेखाभिः कृतपरिष्करणम् ।
६३	५५१	सैव	,,	१९९	,, नवीनं संपूर्णम् अष्टादशस्वध्यायेषु तावद्भिः सुचित्रैर्विचित्रितम् ।
६४	५५२	सैव	,,	२१७	,, आलेख्यैरसहितम् ।
६५	५६६	योगवासिष्ठम् भाषाटीकोपेतम्	वाल्मीकिः	३९०	१ मं वैराग्यप्रकरणम् । इदं हस्तलिखितं देवनागराक्षरलिपिकं नातिप्राचीनावस्थम् । संपूर्णम् ।
६६	५६७	तदेव ,,	,,	१९५	,, २ यं मुमुक्षुप्रकरणम् ।
६७	५६८	तदेव ,,	,,	३३०	,, ३ यमुत्पत्तिप्रकरणम् । १ म भागः ।
६८	५६९	तदेव ,,	,,	२६८	,, ३ यं प्रकरणम् । २ य भागः ।
६९	५७०	तदेव ,,	,,	२५७	,, ३ यं प्रकरणम् । ३ य भागः ।
७०	५७१	तदेव ,,	,,	२६८	,, ३ यं प्रकरणम् । ४ थ भागः ।
७१	५७२	तदेव ,,	,,	२३१	,, ४ र्थं स्थितिप्रकरणम् । १ म भागः ।
७२	५७३	तदेव ,,	,,	२३५	,, ४ र्थं प्रकरणम् । २ य भागः ।

७३	५७४	तद्देव भाषाटीकोपेतम्	,,	२६२	,,	५ मं उपशमप्रकरणम् । १ म भागः ।
७४	५७५	तद्देव ,,	,,	२६९	,,	५ मं प्रकरणम् । २ य भागः ।
७५	५७६	तद्देव ,,	,,	२१६	,,	५ मं प्रकरणम् । ३ य भागः ।
७६	५७७	तद्देव ,,	,,	२७८	,,	५ मं प्रकरणम् । ४ र्थ भागः ।
७७	५७८	तद्देव ,,	,,	३२०	,,	६ ष्ठं निर्वाणप्रकरणम् । १ म भागः ।
७८	५७९	तद्देव ,,	,,	३००	,,	६ ष्ठं प्रकरणम् पू० । २ य भागः ।
७९	५८०	तद्देव ,,	,,	२९७	,,	६ ष्ठं प्रकरणम् पू० । ३ य भागः ।
८०	५८१	तद्देव ,,	,,	२१८	,,	६ ष्ठं प्रकरणम् पू० । ४ र्थ भागः ।
८१	५८२	तद्देव ,,	,,	२५६	,,	६ ष्ठं प्रकरणम् उत्त० । १ म भागः ।
८२	५८३	तद्देव ,,	,,	२५०	,,	६ ष्ठं प्रकरणम् उ० । २ य भागः ।
८३	५८४	तद्देव ,,	,,	२०५	,,	६ ष्ठं प्रकरणम् उ० । ३ य भागः ।
८४	५८५	तद्देव ,,	,,	२५०	,,	६ ष्ठं प्रकरणम् उ० । ४ र्थ भागः ।

सं०	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्रसं.	विवरणम्
८५	५८६	तदेव ,,	,,	२३०	,, ६ ष्ठं प्रकरणम् उ० । ५ म भागः ।
८६	५८७	तदेव ,,	,,	२६५	,, ६ ष्ठं प्रकरणम् उ० । ६ ष्ठ भागः ।
८७	५९२	योगवासिष्ठसारः भाषा	रणवीरसिंहकारितः	२९१	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नूतनावस्थम् असंपूर्णम् ।
८८	५९३	रामगीता	शिवोक्ता	२१	,, संपूर्णम् । (गणेशस्तो० ११३९ अनुबद्धम्) ।
८९	५९४	सैव	,,	३९	,, (महिम्नः स्तो० १२०६ बद्धम्) ।
९०	५९५	सैव	,,	३४	,, (गणेशस्तो० ११४० बद्धम्) ।
९१	५९९	रामहृदयम्	....	१३	,, (गणे० ११४० बद्धम्) ।
	५९९ क	तदेव	....	२५	,, (महिम्नः स्तो० १२०६ बद्धम्) ।

सांख्ययोगादिग्रन्थाः

९२	६४९	घट्योगः	घेरण्डः	९	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनम् असंपूर्णम् ।
९३	६७१	पवनाविजयः (स्वरोदयः)	शिवः	१६	,, संपूर्णम् ।
९४	६७३	पातञ्जलभाष्यम्	पतञ्जलिः	४२	एतत्पुस्तकं भूर्जपत्रात्मकं हस्तलिखितं शारदाक्षरलिपिकम् अतिप्राचीनं जरद्वस्थाकं संपूर्णम् । (निर्णयाम्रु० ३२८ बद्धम्) ।
९५	६९५	शिवस्वरोदयः भाषाटीकोपेतः	शिवः	६५	हस्तलिखितं पुस्तकमिदं नवीनं देवनागराक्षरलिपिकम् असंपूर्णम् ।
९६	६९८	सांख्याविवृत्तिः	विग्रहराजभट्टः	२०	इदं हस्तलिखितं भूर्जपत्रात्मकं पुस्तकं शारदाक्षरलिपिकं जरदवस्थाकम् अतिप्राचीनं संपूर्णम् (निर्णयाम्रु० ३२८ बद्धम्) ।

ज्योतिषग्रन्थाः

९७	७०१	आखेटकप्रश्नः	....	४९	हस्तलिखितमेतत् पुस्तकं देवनागराक्षरलिपिकं नवीनमसंपूर्णम् ।
९८	७०२	काकशास्त्रम्	गर्गः, गौतमश्च ?	२२	,, अस्मिन् ग्रन्थे गर्गमुनिप्रोक्तानुवादात्मक एको भागोऽष्टाध्यायमितः संपूर्णः, अपरो भागो गौतममुनिप्रोक्तानुवादोऽपूर्णः ।
९९	७१८	नरपतिजयचर्या टीकोपेता	नरपतिः विश्वेश्वरः	९३	,, नवीनम् असंपूर्णम् ।
१००	७१९	सैव	,,	८	,, ,, तालपत्रात्मकम् ।
१०१	७३१	मुहूर्तचक्रिका	....	१६२	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नातिप्राचीनं अन्तरान्तरा-रञ्जितैश्चित्रैश्चित्रितम् ।
१०२	७३७	मेघमाला भाषा	मेघराजः	५९	हस्तलिखितमिदं पुस्तकं देवनागरलिपिकं प्राचीनं संपूर्णम् ।
१०३	७३९	रणवीरविजयः भाषाटीकोपेतः	विश्वेश्वरः	५८९	,, मध्ये सार्धशतं पत्राणि विनष्टानि ।
१०४	७४८	लीलावती (पाटीगणितम्)	भास्कराचार्यः	१७५	,, नवीनं संपूर्णम् ।
१०५	७४९	वसन्तराजशाकुनम् भाषाटी-कोपेतम्	वसन्तराजः	२७०	,,
१०६	७५९	स्कन्धास्थिप्रश्नः	विश्वेश्वरः [महेवः	९०	,, नवीनं संपूर्णम् ।
१०७	७६०	स्वप्नचिन्तामणिः	दुर्लभराजात्मजः श्री-	४६	,, नीतिप्राचीनं संपूर्णम् ।

वैद्यक ग्रन्थाः

१०८	७९४	यवनचिकित्सा	....	५०५	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं जीर्णतरमतिप्राचीनम् । आ-दिमं पत्रं विनष्टम्, अन्ततोऽपि विनष्टपत्रकम् ।
१०९	८००	रसकामधेनुः	चूडामणिः	४०६	,, नातिप्राचीनं संपूर्णम् ।
११०	८१४	शालिहोत्रम् भाषाटीकोपेतम् .	गणकविः	६५	इदं पुस्तकं हस्तलिखितं नूतनं देवनागराक्षरलिपिकम् असंपूर्णम् ।

पुराणग्रन्थाः

सं०	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्रसं०	विवरणम्
१११	८३६	नीलमतपुराणम्	महर्षिव्यासः	११६	पुस्तकमिदं हस्तलिखितं देवनागराक्षरलिपिकं नूतनावस्थं संपूर्णम् ।
११२	८३७	तदेव	”	५७	” तालपत्राकारम् ।
११३	८४३	भागवतम्	”	६८०	” प्राचीनं संपूर्णम् । मूलमात्रम् ।

इतिहासग्रन्थाः

सं०	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्रसं०	विवरणम्
११४	८६२	कथासरित्सागरः सभाषानुवादः	भट्टसोमदेवः	२६५	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनम् असंपूर्णम् । (कथामुखलम्बकः) ।
११५	८६३	स एव ”	”	१२	” (कथापीठलम्बकस्य प्रथमस्तरङ्गः) ।
११६	८६४	स एव ”	”	१६	” (कथामुखलम्बकस्य प्रथमस्तरङ्गः, द्विगर्ताक्षरेषु रचितभाषानुवादः) ।
११७	८७९	महाभारतम् सभाषानुवादम्	व्यासः	२६३	” नवावस्थम् । १ म भागः शान्तिपर्वणि मोक्षधर्मः ।
११८	८८०	तदेव ”	”	२४३	” २ य भागः शान्तिपर्व ।
११९	८८१	तदेव ”	”	२८४	” ३ य भागः शान्तिपर्व ।
१२०	८८२	तदेव ”	”	२८६	” ४ र्थ भागः शान्तिपर्व ।
१२१	८९४	माघमाहात्म्यम्	व्यासः	४३	पुस्तकमिदं भूर्जपत्रात्मकं हस्तलिखितं शारदाक्षरलिपिकं प्राचीनतरम् अतिजरदवस्थाकं संपूर्णम् । (निर्णयाम्० ३२८ बद्धम्) ।

१२२	९०१	रामचरितमानसम्	तुलसीदासः	२३५	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं प्राचीनं जरद्वस्थाकं संपूर्णम् ।
१२३	९०७	रामायणम्	”	२६३	” प्राचीनम् । बालकाण्डम् ।
१२४	९०८	तदेव	”	१३४	” आरण्य- किष्किन्धा-सुंदर-लंकाकाण्डात्मकम् ।
१२५	९०९	तदेव	”	१९४	” अयोध्याकाण्डम् ।
१२६	९१०	तदेव	”	११९	” उत्तरकाण्डम् ।
१२७	९२४	हरिवंशसंग्रहः	महर्षिव्यासः	२४३	इदं भूर्जपत्रात्मकं हस्तलिखितं पुस्तकं शारदाक्षरलिपिकम् अतिप्राचीनं जीर्णतरम् । आदितः ६० पत्राणि विनष्टानि, अन्ततोऽपि विनष्टाल्पावशेषकम् ।

संगीतादिग्रन्थाः

१२८	९३७	दानलीला भाषा	राजेन्द्रः	३५	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नूतनं संपूर्णम् ।
१२९	९४७	भक्तविनोद (सुदामचरितम्)	मीहांसिंहः	१३३	”
१३०	९५३	रणवीरसिंहचरितम्	”	४०	” (भक्तवि० ९४७ बद्धम्) ।
१३१	९७५	संगीतविधानम् (भाषा)	....	१३४	” नवीन.वस्थाकं संपूर्णम् ।

तन्त्रशास्त्रग्रन्थाः

१३२	९८५	इन्द्रजालम्	शिवः	९	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं संपूर्णम् । (रुद्रयामल १०७५ बद्धम्) ।
१३३	९८६	उड्डामरेश्वरतन्त्रम्	”	२६	”
१३४	९८८	उड्डीशतन्त्रम्	ईश्वरः	५९	”
१३५	९८९	कंकालमालिनीतन्त्रम्	भैरवः	१९	” (गायत्रीत० १००९ बद्धम्) ।

सं०	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्रसं०		विवरणम्
१३६	९९१	कक्षपुटः	सिद्धनागार्जुनः	७८	”	रसरत्नाकर इत्यस्य नामान्तरम् ।
१३७	९९२	कामधेनुतन्त्रम्	महादेवः	२१	”	(गायत्रीत० १००९ बद्धम्) ।
१३८	९९४	कामरत्नम्	नागभट्टः	३३	”	नवीनम् असंपूर्णम् (तोडलत० १०२८ बद्धम्) ।
१३९	९९५	कामाख्यातन्त्रम्	शिवः	१६	”	(गायत्रीत० १००९ बद्धम्) ।
१४०	९९८	कुलार्णवतन्त्रम्	ईश्वरः	२२३	”	नवं संपूर्णम् ।
१४१	९९९	तदेव	”	५७	”	
१४२	१००२	कौलावलीनिर्णयः	ज्ञानानन्दः	११६	”	(तोडलत० १०२८ बद्धम्) ।
१४३	१००३	क्रमदीपिका	....	३२	”	(बृहन्नील० १०५८ बद्धम्) ।
१४४	१००६	गन्धर्वतन्त्रम्	शिवः	११८	”	(बृहन्नील० १०५८ बद्धम्) ।
१४५	१००९	गायत्रीतन्त्रम्	”	२३	”	नवीनं संपूर्णम् ।
१४६	१०१४	गुप्तसाधनतन्त्रम्	”	१०	”	गायत्रीत० १००९ बद्धम् ।
१४७	१०१६	गौतमीयतन्त्रम्	नारदः	७४	”	नूतनावस्थं संपूर्णम् ।
१४८	१०२१	चीनाचारक्रमः	शिवः	७	”	(तोडलत० १०२८ बद्धम्) ।
१४९	१०२२	ज्ञानार्णवतन्त्रम्	”	१४१	”	
१५०	१०२३	तन्त्रसारः	कृष्णानन्दः	३६४	”	
१५१	१०२४	स एव	”	६	”	असंपूर्णम् (तोडल० १०२८ बद्धम्) ।
१५२	१०२७	तारारहस्यम्	ब्रह्मानन्दगिरितीर्थः	३२	”	नवीनावस्थं संपूर्णम् ।
१५३	१०२८	तोडलतन्त्रम्	शिवः	१२	”	
१५४	१०३०	त्रिपुरासारसमुच्चयः	नागभट्टः	४८	”	(गायत्रीत० १००९ बद्धम्) ।
		सटीकः	....			
१५५	१०३२	दत्तात्रेयतन्त्रम्	ईश्वरः	१७	”	नूतनं नवावस्थाकम् (तोडलत० १०२८ बद्धम्) ।

१५६	१०३३	देवीमाहात्म्यम्	महर्षिव्यासः	१४५	”
१५७	१०३४	तदेव	”	११८	” तालपत्राकारं त्रुटितान्तिमपत्रकम् ।
१५८	१०३५	तदेव	”	७५	”
१५९	१०३६	तदेव	”	१२६	”
१६०	१०३७	तदेव टीकोपेतम्	” [यणः नरसिंहात्मजः नारा-	८०	एतत् भूर्जपत्रात्मकं हस्तलिखितं पुस्तकं शारदाक्षरलिपिकम् अतिजीर्णाव-स्थाकं प्राचीनतरं संपूर्णम् । (निर्णयामृ० ३२८ बद्धम्) ।
१६१	१०४३	देवीरहस्यम्	भैरवः	२१७	पुस्तकमिदं हस्तलिखितं देवनागराक्षरलिपिकं नातिप्राचीनम् असंपूर्णम् ।
१६२	१०४६	निरुत्तरतन्त्रम्	शिवः	३	” नवीनम् असंपूर्णम् (तोडलत० १०२८ बद्धम्) ।
१६३	१०४७	निर्वाणतन्त्रम्	”	१६	” संपूर्णम् । (गायत्रीत० १००९ बद्धम् ।
१६४	१०५१	प्रकीर्णाशतन्त्रम्	ईश्वरः	२४	” (तोडलत० १०२८ बद्धम्) ।
१६५	१०५४	फेत्कारिणीतन्त्रम्	”	३४	” नूतनं संपूर्णम् (तोडलत० १०२८ बद्धम्) ।
१६६	१०५८	बृहन्नीलतन्त्रम्	महाकालभैरवः	४६	”
१६७	१०६६	महानिर्वाणतन्त्रम्	सदाशिवः	८२	” नवीनावस्थं संपूर्णम् ।
१६८	१०६८	मातृकाभेदतन्त्रम्	शिवः	१९	” संपूर्णम् । (गायत्रीत. १००९ बद्धम्) ।
१६९	१०७१	योगिनीतन्त्रम्	ईश्वरः	८९	” संपूर्णम् (गायत्रीत० १००९ बद्धम्) ।
१७०	१०७४	राधातन्त्रम्	”	४२	”
१७१	१०७५	रुद्रयामलम्	भैरवः	१८७	” नवं संपूर्णम् उत्तरकाण्डम् ।
१७२	१०७७	विद्यार्णवतन्त्रम्	विद्यारण्ययतिः	४०८	१ म भागः । हस्तलिखितोऽयं ग्रन्थो देवनागरलिपिको नवीनः ।
१७३	१०७८	तदेव	”	६३३	२ य भागः ।
१७४	१०८०	शक्तिसंगमतन्त्रम्	शिवः	१९३	” नूतनं नवावस्थाकं संपूर्णम् ।
१७५	१०८३	शाक्तानन्दतरङ्गिणी	ब्रह्मानन्दगिरिः	६४	” (गायत्रीत० १००९ बद्धम्) ।
१७६	१०८७	शारदातिलकम्	लक्ष्मणः कृष्णात्मजः	११५	” नवीनावस्थाकं संपूर्णम् ।
१७७	१०८८	शिवताण्डवं (यन्त्रशास्त्रम्) सटीकम्	दक्षिणामूर्तिः नीलकण्ठः	३१	” नवं तालपत्रसमानपत्रकम् । टीकाविरचनकालः संवत् शाकः १६०२ ।

संख्या	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्र संख्या	विवरणम्
१७८	१०९०	श्यामारहस्यम्	पूर्णानन्दगिरिः	१८५	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नातिप्राचीनं संपूर्णम् ।
१७९	१०९१	तदेव	”	६६	” असंपूर्णम् ।
१८०	१०९३	सनत्कुमारतन्त्रम्	शिवः	१२	” नूतनं संपूर्णम् ।
१८१	१०९७	षट्कर्मदीपिका	कृष्णानन्दः	१५	” नवीनम् असंपूर्णम् ।

स्तोत्रादिग्रन्थाः

संख्या	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्र संख्या	विवरणम्
१८२	१०९८	अनुस्मृतिः	”	२०	” संपूर्णम् । (गीता ५५१ बद्धम्) ।
१८३	१०९९	अपराजिताविद्या	नारदः	८	एतत् हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नूतनं संपूर्णम् (गणेश-स्तो० ११३९ बद्धम्) ।
१८४	११००	सैव	”	११	”
१८५	११०२	अपामार्जनस्तोत्रम्	पुलस्त्यः	१४	”
१८६	११०७	आदित्यहृदयम्	महर्षिव्यासः	५५	इदं हस्तलिखितं देवनागरलिपिकं नवीनं संपूर्णम् ।
१८७	११०८	तदेव	”	५५	”
१८८	१११२	इन्द्राक्षीस्तोत्रम्	इन्द्रः	५	” (देवीमा० १०३३ बद्धम्) ।
१८९	११२९	कृष्णाष्टोत्तरशतनाम	महर्षिव्यासः	९	” नवीनं संपूर्णम् (महिम्नः स्तो. १२०६ बद्धम्) ।
१९०	११३०	तदेव	”	१५	”
१९१	११३१	तदेव	”	१३	”
१९२	११३४	गजेन्द्रमोक्षणम्	”	४५	” नवं संपूर्णम् (गीता ५५१ बद्धम्) ।
१९३	११३५	गणपतिसहस्रनामावली	....	५९	” (रामस० १२२६ बद्धम् ।)

१९४	११३९	गणेशस्तोत्रम्	श्रीकृष्णः	६	”
१९५	११४०	तदेव	”	१०	”
१९६	११४१	गङ्गाधरनीराजनम्	चण्डीदासः	११	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नवीनं संपूर्णम् ।
१९७	११४२	गुरुगीता	महेश्वरः	४०	”
१९८	११४३	सैव	”	२८	” ११४२ बद्धम् ।
१९९	११४५	गुरुस्तोत्रम्	”	७	” (गुरुगीता ११४२ बद्धम्) ।
२००	११४६	तदेव	”	८	” ११४२–११४३ संबद्धम् ।
२०१	११५०	गोविन्दस्तोत्रम्	यमः	५	” (गणेशस्तो० ११३९ बद्धम् ।)
२०२	११५१	तदेव	”	५	” असंपूर्णम् ।
२०३	११५३	जानकीशतनाम	श्रीरामः	५	” (महिम्नः स्तो० १२०६ बद्धम्) ।
२०४	११६०	त्रिशती (ललितात्रिशती) सटीका	महर्षिव्यासः भारतीभास्कररायः	५६	इदं पुस्तकं हस्तलिखितं देवनागराक्षरलिपिकं नवीनावस्थाकं संपूर्णम् ।
२०५	११६१	दुर्गास्तोत्रम्	व्यासः	१०	”
२०६	११६२	तदेव	”	६	” (महिम्नः स्तो० १२०६ बद्धम्) ।
२०७	११६३	तदेव	”	८	” (गणेशस्तो० ११३९ बद्धम्) ।
२०८	११६४	तदेव	”	६	”
२०९	११६५	तदेव	”	१०	”
२१०	११६६	देवीकवचम्	”	१८	” नवीनं संपूर्णम् ।
२११	११७५	नारायणहृदयम्	....	६	हस्तलिखितं देवनागराक्षरलिपिकं नवीनं संपूर्णम् ।
२१२	११८०	पादुकास्तोत्रम्	शिवः	७	” (गुरुगीता० ११४२ बद्धम्) ।
२१३	११८१	तदेव	”	८	” ”
२१४	११९२	भवानीसहस्रनामावली	”	५२	” (रामस० १२२६ बद्धम्) ।
२१५	११९३	भवानीस्तोत्रम्	ब्रह्मा	६	” (गणेशस्तो० ११३९ बद्धम्) ।

संख्या	ग्रन्थांकः	ग्रन्थनाम	कर्तृनाम	पत्रसं.	विवरणम्
२१६	११९४	तदेव	”	८	” (महालक्ष्मीस्तो० १२०३ बंद्धंम्) ।
२१७	११९५	भीष्मस्तवराजः	महर्षिर्व्यासः	३५	” (गीता ५५१ बद्धम्) ।
२१८	११९६	मङ्गलस्तोत्रम्	शंकरः	८	”
२१९	१२००	महालक्ष्मीकवचम्	विष्णुः	३	” नवं संपूर्णम् । (गणेशस्तो० ११३९ बद्धम्) ।
२२०	१२०१	तदेव	”	४	”
२२१	१२०२	महालक्ष्मीस्तोत्रम्	इन्द्रः	५	” (गणेशस्तो० ११३९ बद्धम्) ।
२२२	१२०३	तदेव	”	६	”
२२३	१२०५	महिम्नःस्तोत्रम्	पुष्पदन्तः	२६	हस्तलिखितोऽयं ग्रन्थो देवनागराक्षरलिपिको नवीनो नवावस्थाकः संपूर्णः (गणेशस्तो० ११३९ बद्धः) ।
२२४	१२०६	तदेव	”	२८	”
२२५	१२०७	तदेव	”	१५	” (गणेशस्तो० ११४० बद्धम्) ।
२२६	१२०९	मृत्यवष्टकम्	मार्कण्डेयः	३	” (महिम्नः स्तो० १२०६ बद्धम् ।) ।
२२७	१२१०	तदेव	”	४	”
२२८	१२११	तदेव	विष्णुः	३	” (महिम्नः स्तो० १२०६ बद्धम्) ।
२२९	१२१२	तदेव	”	३	” १२१० बद्धम् ।
२३०	१२१७	रामकवचम्	शिवः	....	दीर्घकपत्रचित्रितं हस्तलिखितमिदं नागराक्षरलिपिकं नवीनं संपूर्णम् । (सूर्यक० १२८२ अनुगतम्) ।
२३१	१२१८	तदेव	”	८	” (महिम्नः स्तो० १२०६ बद्धम्) ।
२३२	१२१९	तदेव	”	१४	” (गणेशस्तो० ११४० बद्धम्) ।
२३३	१२२०	तदेव	”	१२	” (गणेशस्तो० ११४० संबद्धम्) ।
२३४	१२२१	तदेव	”	१७	”

२३५	१२२२	रामरक्षास्तोत्रम्	……………	२०	,, (गणेशस्तो० ११३९ बद्धम्)।
२३६	१२२३	तदेव	……………	१३	,, (गणेशस्तो० ११४० बद्धम्)।
२३७	१२२६	रामसहस्रनाम	शिवः	३९	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नवीनं संपूर्णम् ।
२३८	१२२८	रामस्तोत्रम्	ब्रह्मा	४	,, (गणेशस्तो० ११४० बद्धम्)।
२३९	१२२९	तदेव	,,	५	,,
२४०	१२३०	तदेव	,,	४	,, नवमसंपूर्णम् ।
२४१	१२३१	रामहृदयम्	शिवः	२५	,, (महिम्नः स्तो० १२०६ बद्धम्)।
२४२	१२३४	लक्ष्मीनृसिंहकवचम्	महर्षिव्यासः	५	इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं संपूर्ण नवावस्थं (महिम्नः-स्तो० १२०६ बद्धम्)।
२४३	१२३५	तदेव	,,	६	,,
२४४	१२३६	लक्ष्मीहृदयम्	……………	२३	,, (नारायणहृ० ११७५ बद्धम्)।
२४५	१२३७	लघुचण्डी (दुर्गास्तोत्रम्)	……………	१२	,, (महिम्नः स्तो० १२०६ बद्धम्)।
२४६	१२३८	सैव	……………	७	,, (गणेशस्तो० ११३९ बद्धम्) [बद्धम्)।
२४७	१२३९	सैव	……………	………	,, नातिनवीनं दीर्घपत्रैकचित्रितम् । (सूर्यकव० १२८२
२४८	१२४०	लघुस्तवः	……………	९	,, (देवीमा० १०३३ संबद्धम्)।
२४९	१२४१	ललितासहस्रनामकम् भाष्यसहितम्	महर्षिव्यासः भारतीभास्करराय:	२६५	,, (त्रिशती ११६० बद्धम्) भाष्यविरचनकालः संवत् १७८५ ।
२५०	१२४२	ललितासहस्रनामावली	,,	५८	,, (रामस० १२२६ बद्धम्)
२५१	१२४३	वटुकभैरवकवचम्	शिवः	६	,, लिपिकाल. संवत् १९४२ ।
२५२	१२४४	वटुकभैरवस्तोत्रम्	,,	४	,, १२४३ बद्धम् ।
२५३	१२४६	विष्णुनामसहस्रम्	महर्षिव्यासः	४६	,, (गीता ५५१ बद्धम्)।
२५४	१२५३	विष्णुसहस्रनामावलिः	,,	४२	,, (महिम्नः स्तो० १२०६ अनुबद्धम्)।
२५५	१२५४	सैव	,,	७९	,, (गणेशस्तो० ११३९ बद्धम्)।
२५६	१२५५	सैव	,,	६५	,, (गणेशस्तो० ११४० बद्धम्)।

सं.	ग्रन्थाङ्कः	ग्रन्थनाम	कर्तृनाम	पत्रसं.	विवरणम्
२५७	१२५६	सैव	,,	५७	,,
२५८	१२५७	सैव	,,	५३	,,
२५९	१२५८	सैव	,,	९२	,, (संध्या ४८६ बद्धम्)।
२६०	१२५९	सैव	,,	८४	,,
२६१	१२६९	शिवसहस्रनामावलिः	व्यासः	५१	हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नूतनं संपूर्णम् (रामस० १२२६ अनुबद्धम्)।
२६२	१२७१	शिवस्तोत्रम्	....	५	,, (गणेशस्तो० ११४० बद्धम्)।
२६३	१२७२	तदेव	....	६	,,
२६४	१२७३	शिवस्मरणम् भाषा	....	३६	,,
२६५	१२७४	शीतलास्तोत्रम्	ईश्वरः	४	,, (गणेशस्तो० ११३९ बद्धम्)।
२६६	१२७५	तदेव	,,	५	,, (मृत्युअष्टक १२१० बद्धम्)।
२६७	१२७९	संकट स्तोत्रम् भाषा	....	८	,,
२६८	१२८२	सूर्यकवचम्	शिवः	....	,, दीर्घैकपत्राचित्रितं प्राचीनं संपूर्णम् ।
२६९	१२८३	तदेव	,,	१०	,, (महिम्नः स्तो० १२०६ बद्धम्)।
२७०	१२८४	तदेव	,,	६	,, ब्रह्मयामलीयम् ।
२७१	१२९३	हनुमत्कवचम्	विभिषणः	१०	,, (गणेशस्तो० ११३९ बद्धम्)।
२७२	१२९४	तदेव	,,	१६	,,
२७३	१२९५	हनुमत्स्तोत्रम्	,,	४	,, (गणेशस्तो० ११३९ बद्धम्)।
२७४	१२९६	तदेव	,,	४	,, (गणेशस्तो० ११३९ बद्धम्)।

१७

७०१ आखेटकप्रश्नः ।

इदं पुस्तकं देवनागराक्षरलिपिकं नवावस्थम् असंपूर्णम् । पत्रसंख्या ४९ । प्रतिपत्रे श्रेणिसंख्या ६ । प्रतिश्रेण्यक्षरसंख्या १७ । संनिवेशः ८½ × ६$\frac{1}{16}$ ।

आरम्भः

ओं श्रीरामाय नमः । अथ [आ] खेटक प्रश्न लिखते हों अछकारका प्रश्न हे

लग्नस्थिते सूर्यसुतेश्व[च] राहो[हौ]
सूर्येक्षिते वैरिनिमन्त्रितस्य ।
आखेटकः स्यात्सक[फ] लोऽरिदृष्ट्या
कष्टाद्दृष्ट्या विफलोऽल्पको वा ॥

अन्तः

रवेर्मेषतुलौ प्रोक्तौ चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्कौ च कन्यामीनौ बुधस्य च ॥
जीवस्य कर्कमकरौ मीनकन्ये सितस्य च ।
तुलामेषौ तु मन्दस्य उच्चनीचा उदाहृतौ ॥

१५-१६

२७३-२७४ आह्निकपद्धतिः ।

नव्यचण्डीदासविरचिता

पुस्तकमेतत् देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णम् । पत्रसंख्या १०८ । श्रेणिसंख्या १२ । प्रतिश्रेण्यक्षरसंख्या १२ । संनिवेशः ८½ × ५½ ॥ विषयश्चात्र राजपुत्राणां विनेयमतिमतामहोरात्रं क्रमेणावश्यानुष्ठेयसद्व्यवहाराभिधानपूर्वं स्वामि–अमात्य–सुहृत्–कोश–राष्ट्र–दुर्ग– बलात्मकराज्याङ्गसंवर्धकराजनीतिप्रदर्शिनी कार्यप्रणालीति ।

आरम्भः

ॐ श्रीगणेशाय नमः ॐ सरस्वत्यै नमः श्रीगुरुभ्यो नमः ॥ ॐ
श्रीमत्पादयुगं प्रणम्य विहितानुष्ठानयोरात्मनः
पित्रोः प्रेम्णि निदानयोर्मम सदाचारप्रचारे पुरा ।
कुर्वे **श्रीरणवीरसिंह**नृपतेरादेशतोऽशेषतः
संक्षिप्ताह्निककृत्यमार्जवजुषां राजात्मजानां मुदे ॥ २ ॥

कृपया शृणुयादभीप्सितान्
परपाठानपि मामपाठयन् ।
उपकुर्वत एव तेऽधुना
तदनुस्मृत्य मुहुर्नमामि तान् ॥ २ ॥

अथ श्रीम**ज्जम्बूकाश्मीरा**द्यनेकोरुदेशाधिपत्यविख्यात—यशोमण्डपमण्डिताखिल-महीमण्डलाखण्डल-**श्रीमन्महाराजरणवीरसिंहवर्म**-प्रभुवर्यनिर्दिष्टावसरोत्थानादिशयनावधि-**श्रीमत्प्रतापसिंहादियुवराजा**वश्यकरणीय— कार्यजाताभिधानपूर्वकविभक्ततत्प्रकरणार्ह-घट्यात्मकसमया सरलपद्या सुगमसंस्कृतपदापि च अतिसंक्षिप्ताह्निकपद्धतिर्निबध्यते **नव्यचण्डीदासेन** मया । सा यथा तत्र तावद्यद्यपि

" ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत् " ।

इति मन्वाद्यभिहितसमये उत्थानं योग्यमपि आलपितं तथापि युवराजस्य सुकुमारतया सूर्योदयात् प्रागुत्थानं दन्तधावनस्नानादिकं चेति सांप्रतमिति प्रभूणामाशयः । एवमेवाग्रेऽपि विद्वद्भिरवसेयम् । तद्यथा

मतिरस्य विलासिनी वरा
विहरन्ती न यथा स्खलेत्कदा ।
युवराज्य[ज]कृते निबध्यतां
सरला संस्कृतसारपद्धतिः ॥ १ ॥

पुष्पिका

इति श्रीमन्महाराजाधिराजात्मजानुष्ठानाहा**ह्निकपद्धतौ** चतुर्थयामवर्णना चतुर्याम-विश्रान्तिर्नवमी निःश्रेणिः ।

अन्तः

सदाचारां रम्यां स्थितिविधिविशेषैर्दिननिशोः
सगोत्रा भूमिर्यां रविरुडुपतिर्यावदुदधिः ।

सुपुत्राद्यास्तावज्जगति रणवीरादिकहरेः
श्रयन्तु श्रीमन्तोऽनुपदसरलां पद्धतिमिमाम् ॥

इति श्रीसकलगुणगणागार-सद्धर्मरक्षणैकविलसद्विचारसंभावितवेदाध्ययनप्रकारनानालंकारसंभारसंभासित-कविपण्डितमहोदार-श्रीजम्बूकाश्मीराद्यनेकायत्तदेशाधिपतिश्रीमन्महाराजाधिराज- -श्रीरणवीरसिंहप्रभुवर्यादिष्ट-श्रीकुरुक्षेत्रमध्यरेखान्तर्गतपुण्डरीकपुरप्रसिद्धसवाल्वंशावतंस-श्रीदुर्गादत्तात्मजनव्यचण्डीदासकृता श्रीमन्महाराजपुत्रपौत्रप्रपौत्राद्यैराकल्पमाश्रयणार्हा सनयाह्निकपद्धतिः । श्रीरस्तूभयोः सर्वदा श्रीः ॥ ॥

६१

५०८ ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी ।

महामाहेश्वराभिनवगुप्ताचार्यविरचिता

इदं भूर्जपत्रात्मकं पुस्तकं शारदाक्षरलिपिकमतिजीर्णावस्थं प्राचीनतरम् आद्यन्तभागविहीनम् । पत्रसंख्या १९९ । श्रेणिसंख्या १६ । प्रतिश्रेण्यक्षरसंख्या २४—२९ । संनिवेशः ७३/८ × ७१/६ ।

अस्मिन् ग्रन्थे सूत्रवृत्ती आश्रित्य तदुभयासूत्रितस्य ईश्वरप्रत्यभिज्ञोक्तमतस्य परस्परार्थसंवादसंयोजनरचनया विरुद्धमतोद्घाटनतन्निरासनक्रमपुरःसरं विस्तरतो विवेचनाकलनप्रदर्शनं चतुर्भिरधिकारैर्विरचितमस्ति ।

आरम्भः

× × × × × × × ×

स्ति तेन भातव्यं क्षणिकत्वाद्यंशस्यानिर्भासात् अविद्यादिनिवृत्ति..................नैर्मल्यादुच्यते । संस्कारसाक्षात्करणात् पूर्वजातिज्ञानमिति ततः पीतप्रत्ययाद्धरितप्रत्ययो नीलपीतहरितप्रकाशनशक्तिमानपि हरितप्रकाश एव ।

पुष्पिका

इति महामाहेश्वरश्रीमदाचार्याभिनवगुप्तविरचितायाम् ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यां पूर्वपक्षविमर्शो द्वितीयः ॥

अन्तः

शुद्धप्रकाशस्य तु प्रमातृरूपान्तरं मनागपि न सह्यम् अनेनाभिप्रायेण..................रत्वन्त्र ? स्यादिति वृत्तिवाक्येन अभ्युपगमेनाप्याह तथापि चेति ।

१३३

९८६ उड्डामरेश्वरतन्त्रम् ।

शिवप्रोक्तम्

इदं पुस्तकं देवनागराक्षरलिपिकं नूतनं नवीनवस्त्रं संपूर्णं । पत्रसंख्या २६ । श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २२-२४ । पत्रसंनिवेशः १२$\frac{9}{2}$ × ९$\frac{६}{२}$ ।

आरम्भः

श्रीगणेशाय नमः

उड्डीशेन समाकीर्णा योनिवृन्दसमाकुला ।
प्रणम्य शिरसा देवी गौरी पृच्छति शंकरम् ॥
ईश्वर श्रोतुमिच्छामि लोकनाथ जगत्प्रभो ।
प्रसादं कुरु देवेश ब्रूहि धर्मार्थसाधनम् ॥
वशीकरणमुच्चाटं मोहनं स्तम्भनं तथा ।
शान्तिकं पौष्टिकं वाथ करणानि बहूनि च ।

अन्तः

अजिनपूर्वपत्रादिभिर्निर्जितास्त्वष्टजन्मा मनोहरी कृता अनन्तरमेषदुग्धं करतमृदितनालं क्वेव जातः वैदग्धेन तेषां ततः (?) ॥

पुष्पिका

इति श्री**उड्डामरेश्वरे** महातन्त्रे **रुद्रायामलो**द्धृते श्रीमहादेवपार्वतीसंवादे उड्डीशाख्यः पटलः संपूर्णः ॥ शुभम् ॥

अस्मिन् ग्रन्थे पटलोद्दिष्टा विषया अमी

१. भूतज्वरग्राहण-उच्चाटन-विद्वेष—मारणसाधनम् ।
२. जलस्तम्भन - लूताकरण - सस्यविनाशनादि - उन्मत्तान्ध - वशनिर्विषीकरण - अञ्जनसिद्धिसाधनम् ।
३. उच्चाटन-भूतब्रह्मराक्षसग्राहणसाधनम् ।
४. कंकालादिसाधनम् ।
५. लिंगस्थौल्ययोनिसंकोचनसाधनम् ।
६. पञ्चभूताक्षरशुभाशुभविज्ञानम्
७. ओषध्युत्पाटनादिविधिः ।

८. नारीगर्भधारणोपायमयूरशिखौषधिप्रयोगसिद्धिः ।

९. नागदमन्योषधिप्रयोग—गुञ्जाकल्प—वशीकरणतिलकाञ्जनसंमोहनचूर्णादि—डाकिनीदमनादि—अष्टयक्षिणीसाधन—षट्त्रिंशद्यक्षिणीसाधनम् ।

१०. चेटकसाधनम् ।

११. दिग्बन्धनयोनिसंकोचन—लिङ्गलेपसाधनम् ।

१२. नानासिद्धिसाधनमन्त्रप्रयोगः ।

१३. मन्त्राभिषेकफलविधिः ।

१४. निपात-महावृष्टि-रोगप्रशान्ति-वशीकरणाकर्षणादिसिद्धिसाधनम् ।

१५. विद्याधरत्व—पादुका-वेतालसिद्धि—अदृश्यत्वादि—कवित्वसिद्ध्यादि—मरणादेभूतादिकथन-मन्त्रकोशकथनम् ।

१६. सर्वोच्चाटनादिनानाप्रयोगविधिः ।

१३५

९८९ कंकालमालिनीतन्त्रम् ।

भैरवोक्तम्

एतत् पुस्तकं देवनागरलिप्यङ्कितं नवीनावस्थं संपूर्णम् । पत्रसंख्या १९ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २२ । पत्रसंनिवेशः $12\frac{1}{2} \times 9\frac{1}{4}$ ।

आरम्भः

ओं अथ कंकालमालिनीतन्त्रम् । ओं नमः श्रीगुरवे

भैरवी उवाच

त्रिपुरेश महेशान पार्वतीप्राणवल्लभ ।
जगद्वन्द्य शूलपाणे वर्णानां कारणं वद ॥

श्रीभैरव उवाच

कथयामि वरारोहे वर्णानां भेदमुत्तमम् ।
न प्रकाश्यं महादेवि तव स्नेहात्सुभाषितम् ॥
यज्ज्ञात्वा योगिनो यान्ति निर्गुणत्वं मम प्रिये ।

अन्तः

स्त्रीशूद्राणां पुरश्चर्या नास्ति भद्रे कदाचन ।
जपपूजा सदैवासां प्रशस्ता वीरवन्दिते ॥

चन्द्रसूर्योपरागे च शूद्राणां सिद्धिरुत्तमा ।
जायते सुभगे मातर्गुरुभक्तिर्भवेद्यदि ।
तदा सिद्धिमवाप्नोति गुरुभक्त्या विशेषतः ॥

पुष्पिका

इति दक्षिणाम्नाये श्रीकंकालमालिनीतन्त्रे पञ्चमः पटलः समाप्तः ॥ ॥

अस्मिन् तन्त्रे पटलोद्दिष्टविषयाणां प्रदर्शनम् ।

१. वर्णबीज-सङ्केतकथनम् ।
२. योनिबीज-मुद्रा-षडाधार-योनिकवचनिर्णयः ।
३. गुरुपूजन-कवच-गीतावर्णनम् ।
४. महाकालीमन्त्राणामुद्धार-संक्षिप्तपूजापद्धतिविधिः ।
५. पुरश्चरणपद्धतिविधानम् ।

९८

७०२ काकशास्त्रम् ।

इदं पुस्तकं देवनागराक्षरालिपिकं नूतनं नवावस्थाकम् असंपूर्णम् । पत्राणां संख्या २२ । श्रेणिसंख्या ११ । प्रतिश्रेण्यक्षरसंख्या १२ । संनिवेशः ९½ × ७½ ।

आरम्भः

ओं स्वस्ति श्रीगणेशाय नमः ओं

प्रतिपत्य महादेवं नमस्कृत्य त्रिलोचनम् ।
वायसानां रुतं वक्ष्ये सद्यः प्रत्ययकारकम् ॥ १ ॥
लोकानां च हितार्थाय यथा गर्गेण भाषितम् ।
मण्डलं च चतुष्कोणं गोमयेन तु लेपयेत् ॥ २ ॥
पद्मपत्रं तथा श्व[शु]भ्रमथ वा कदलीदलम् ।
पूर्वामाश्रित्य बलिं दद्यादथवा चोत्तरां दिशम् ॥ ३ ॥
ओदनं दधिसंयुक्तं विजितात्मा जितेन्द्रियः ।
गन्धपुष्पार्चनं कृत्वा दिशो भावेन सर्वदा ॥ ४ ॥
तत्र काकालयं गत्वा सत्यं सत्यं वदेद् ध्रुवम् ।
दिशांश्च [च] विदिशां चैव सर्वदा लक्षयेद् बुधः ॥ ५ ॥

पूर्वामाश्रित्य भुञ्जीतः [त] श्रीकामं च प्रजायते ।
पर्जन्यो वर्षति शीघ्रं सुभिक्षं पश्चिमे जयम् ॥ ६ ॥

पुष्पिका

इति **श्रीगर्गऋषिकृते ? काकशास्त्रे** जातिवर्णकथनं नाम अष्टमोऽध्यायः ॥

अन्तः

आयाति दुष्टोऽभिमुखो यदादौ
क्रीडां प्रकुर्वंश्च लुव ? त्र्यथार्थे ।
शीघ्रं तदानीं ध्रुवमध्वगानां
भवे [त्] सुहृत्तो धनधान्यलाभः ॥

अस्मिन् ग्रन्थेऽध्यायेषु प्रतिपादिता विषयाः । पूर्वभागे

१. बलिनिमित्तवर्णनम् ।
२. पिण्डलक्षणविवरणम् ।
३. प्रहरचतुष्टयक्रमेण काकवृत्तनिरूपणम् ।
४. यात्राप्रस्थितस्य खगचेष्टितैर्भाविफलसूचनम् ।
५. काकगतिप्रयोजनकथनम् ।
६. आलयविज्ञानफलम् ।
७. शीततोयस्नानादिफलनिर्देशः ।
८. काकानां जातिवर्णनिरूपणम् ।

अपरभागे

१. दिक्क्रमेण रवतां काकानां फलसूचना ।
२. × × (लिपिभ्रष्टमिति अनुमीयते)
३. दिक्षु तृतीयप्रहरे तद्वृत्तकथनम् ।
४. प्रागादिदिक्षु चतुर्थप्रहरफलवर्णनम् ।
५. कृकलासफलवचनम् ।

२

९६ कातन्त्रलघुवृत्तिः ।

छुच्छुकभट्टविरचिता ।

एतत्पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थं संपूर्णम् । पत्राणां संख्या १७८ प्रतिपृष्ठं श्रेणिसंख्या १२ । प्रतिश्रेण्यक्षरसंख्या १५ । पत्रसंनिवेशः ८$\frac{१}{२}$ × ७

इदं च त्रिभिः प्रकरणैः पादविभागगर्भितैर्नामाख्यातकृत्संज्ञकैः विरचितसंदर्भ-णोपन्यासम् । स्वामिकार्तिकेयादुपलभ्य **शर्मवर्मा**चार्येण विरचितेषु सूत्रेषु संक्षिप्ता लघ्वी वृत्तिः बालानां व्याकरणावबोधमनायासेन बोधयितुं संदृब्धा। प्रायशः प्राक् त्रिंशतो वर्षेभ्यः कश्मीरेषु प्रतिपाठशालं शास्त्राऽध्यवगाहनाय अयमेव व्याकरणपोतोऽध्ययनप्रारम्भे समाश्रीयत ।

आरम्भः

ओं **सिद्धो वर्णसमाम्नायः** वर्णानामकारादीनां वर्णानां य समाम्नायः क्रमेण पाठः सः सिद्धः प्रसिद्धः लोके इति किं तेनोपदिष्टेन आविद्वदङ्(ग)नागोपालबालपर्यन्तं यावत् वर्णाः ४९ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः ॥ क ख ग घ ङ । च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह। वर्णसंज्ञया क्व प्रयोजन सर्वत्र ॥ **तत्र चतुर्दश आदौ स्वराः** ॥ तत्र प्रसिद्धे वर्णसमाम्नाये आदौ ये चतुर्दश वर्णास्ते स्वरसंज्ञा भवन्ति स्वराः १४ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ स्वरसंज्ञया क्व प्रयोजनं रोरे लोपं स्वरश्च पूर्वो दीर्घ इत्यादिषु ॥ **दश समानाः** ॥ तत्र प्रसिद्धे वर्णसमाम्नाये आदौ ये दश वर्णाः । ते समानसंज्ञा भवन्ति समाना-१० अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ समानसंज्ञया क्व प्रयोजनं समानः सवर्णे दीर्घीः भवति परश्च लोपम् इत्यादिषु ॥ **तेषां द्वौ द्वावन्योन्यस्य सवर्णौ** तावन्योन्यस्य परस्परं सवर्णसंज्ञो [ज्ञौ] भवतः ॥ सवर्णः १० अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ कः कस्य सवर्णः अकारस्य आकारः सवर्णः आकारस्य अकारः सवर्णः उकारस्य ऊकारः सवर्णः ऊकारस्य उकारः सवर्णः ऋकारस्य ॠकारः सवर्णः ॠकारस्य ऋकारः सवर्णः ऌकारस्य ॡकार सवर्णः ॡकारस्य ऌकारः सवर्णः ॥

पुष्पिका

इति **लघुवृत्तौ** नामप्रकरणे स्त्रीप्रत्ययपादः समाप्तः सप्तमः ॥ ७ ॥ नामप्रकरणं समाप्तम्

इति **लघुवृत्तावा**ख्यातप्रकरणे घुट्प [पा] दोऽष्टमः ॥ ८ ॥

आख्यातप्रकरणं समाप्तम् ॥

अन्तः

अवर्णाद्रूटो वृद्धिः ॥ अवर्णात्परस्य ऊटो वृद्धिर्भवति भावयतीति भौः यावयतीति यौः भू स यु मि भवन्तं यवन्तं प्र इन् क्विप् कारितलोपः च्छ्(व)ोः शूटाविति वस्य ऊट् इकार॥ इहार्थः अनेन वृद्धिः शास्त्रान्ते वृद्धिशब्दो मङ्(ग)लार्थः ॥ इति **श्रीलघुवृत्तौ** कृत्प्रकरणे धातु-संबन्धपाठः षष्ठः समाप्ता [प्तः] ॥ शुभम् ॥

१३७

९९२ कामधेनुतन्त्रम् ।

महादेवप्रोक्तम्

पुस्तकमिदं देवनागराक्षरलिपिकं नवीनं नवावस्थं संपूर्णम् पत्रसंख्या २१ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २४ । संनिवेशः १२$\frac{५}{८}$+९$\frac{१}{२}$ ।

आरम्भः

ओं नमः परदेवतायै

श्रीपार्वत्युवाच

देवदेव महादेव सर्वागमविशारद ।
अधुना देवदेवश पञ्चाशद्वर्णमुत्तमम् ।
तत्त्वं रूपं महादेव कथयस्व दयानिधे ।
कृपया कथयेशान यद्यहं तव वल्लभा ॥

श्रीमहादेव उवाच

अधुना संप्रवक्ष्यामि रहस्यमतिगोपनम् ।
येन विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥

अन्तः

अनुलोमविलोमेन जप्त्वामृतमयो भवेत् ।
केवलं कामिनीं ध्यात्वा प्रफुल्लवदनान्तर [ा] म् ॥
बीजादुत्पद्यते देवो देवी वा कमलेक्षणे ।
ततस्तु देवतां ध्यात्वा निरीक्ष्य देवविग्रहम् ॥

पुष्पिका

इति **श्रीकामधेनुतन्त्रे** महादेवमहादेवीसंवादे एकविंशतितमः पटलः समाप्तः शुभम् ॥

अस्मिंस्तन्त्रे पटलेषूद्दिष्टा विषयाः ।

१—६. अक्षराणां तत्त्ववर्णादिविनिर्णयः ।
७. मातृकामन्त्रनिर्णय-ध्यानादिविधिः ।
८. मातृकायास्तत्त्वार्थवर्णनम् ।
९. मन्त्रस्य जीवन्यासक्रमनिरूपणम् ।
१०. मातृकामूर्तिन्यासनामादिकीर्तनम् ।

१३९

९९५ कामाख्यातन्त्रम् ।

शिवप्रोक्तम्

एतत् हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णम् । नवसु पटलेषु विरचितसंदर्भणोपन्यासम् । पत्रसंख्या १६ । प्रतिपृष्ठं श्रेणिसंख्या २२—२४ । प्रतिश्रेण्यक्षरसंख्या २१ । पत्रसंनिवेशः $१२\frac{५}{८} \times ९\frac{१}{४}$ ।

आरम्भः

ॐ श्रीगणेशायनमः ॐ नमः परदेवतायै देव्युवाच ॥
भगवन् सर्वधर्मज्ञ सर्वविद्याप्रिय प्रभो ।
सर्वदानन्दहृदय सर्वागमप्रकाशक ॥
(शुभा?श्रुता) नि सर्वतन्त्राणि साधनानि च भूरिशः ।
विद्यास्ताः सकला देव फलानि त्वत्प्रसादतः ॥

श्रीशिव उवाच

शृणु देवि मुद्रा भद्रे मदीयप्राणवल्लभे ।
योनिरूपा महाविद्या कामाख्या वरदायिनी ॥
.. ।
तस्यास्तन्त्रं प्रवक्ष्यामि सावधानावधारय ॥

अन्तः

दद्यात् शान्ताय शुद्धाय कौलिकाय महेश्वरि ।
कालीभक्ताय शैवाय वैष्णवाय शिवाज्ञया ॥
अद्वैतभावयुक्ताय महाकालप्रजापिने ।
सुरास्त्रीवन्दकायापि शिवाबलिप्रदाय च ॥

पुष्पिका

इति कामाख्यातन्त्रे पार्वतीश्वरसंवादे नवमः पटलः समाप्तः ॥

इति श्रीरसिकमोहनचट्टोपाध्यायकर्तृकसंकलिततन्त्रसारे विविधतन्त्रसंग्रहे कामाख्यातन्त्रं समा (प्ताः ? प्तम्) ॥

अस्मिंस्तन्त्रे पटलप्रतिपाद्या विषया अमी ।

१. तन्त्रोपोद्धातवर्णनम् ।
२. कामाख्यामन्त्रमहिम-तदुद्धार-ध्यानपूजादिनिर्णयः ।
३. मन्त्रान्तरसाधन-तद्ध्यान-लतासाधननिरूपणम् ।
४. गुरुतत्त्ववर्णन-दिव्य-वीर-पशुविशेषलक्षणम् ।
५. पञ्चतत्त्वाराधनीयदेवी साधनान्तरवर्णनम् ।
६. शत्रुनाशनोच्चाटनादिसाधन—शुक्रादिशुद्धिवर्णनम् ।
७. पूर्णाभिषेकविधान—तन्मन्त्र—कौलाधिकारगुर्वादिनिर्वचनम् ।
८. मुक्तितत्त्वनिर्णयः ।
९. कामाख्यातत्त्व—तन्त्रप्रशंसार्थवादकथनम् ।

१४३

१००३ क्रमदीपिका.

इदं पुस्तकं हस्तलिखितं देवनागराक्षरलिपिकं नूतनं नवीनावस्थाकं संपूर्णमष्टमु पटलेषु प्रपञ्चितसंदर्भणम् । पत्राणां संख्या ३२ । प्रतिपृष्ठं श्रेणिसंख्या २४ प्रतिश्रेण्यक्षरसंख्या २०–२४ । पत्रसंनिवेशः १३ × ९ ३/४ ।

आरम्भः

ओं श्रीगणेशायनमः ॥

कलात्तमायालवकान्तमूर्तिः
कणत्कणद्वेणुनिदादरम्यः ।

श्रितो हृदि व्याकुलयंस्त्रिलोकीं
श्रियेऽस्तु गोपीजनवल्लभो वः ॥ १ ॥

गुरुचरणसरोरुहद्वयोत्थान्-
महितरजः कणकान् (प्रणम्य) मूर्ध्ना ।
गदितमिह विविच्य नारदाद्यै-
र्यजनविधिं कथयामि शार्ङ्गपाणेः ॥ २ ॥

क्षितिसुरनृपविट्तुरीयजानां
मुनिवनवासिगृहस्थवर्णिनां च ।
जपहुतयजनादिभिर्मनूनां
फलति हि कश्चन कस्यचित् कथंचित् ॥ ३ ॥

सर्वेषु वर्णेषु तथाश्रमेषु
नारीषु नानाह्वयजन्मभेषु ।
दाता फलानामभिवाञ्छितानां
द्रागेव गोपालकमन्त्र एषः ॥ ४ ॥

नूनमच्युतकटाक्षपातने
कारणं भवति भक्तिरञ्जसा ।
तच्चतुष्टयफलाप्तये ततो
भक्तिमानधिकृतो हरौ गुरौ ॥ ५ ॥

स्नातो निर्मलशुद्धसूक्ष्मवसनो धौताङ्घ्रिपाण्याननः
स्वाचान्तः सुपवित्रमुद्रितकरः श्वेतोर्ध्वपुण्ड्रोज्ज्वलः ।
प्राचीदिग्वदनो निबध्य सुदृढं पद्मासनं स्वस्तिकं
स्वासीनः स्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः ॥६॥

पुष्पिका

इति क्रमदीपिकायां प्रथमः पटलः ॥

अन्तः

जगदिदमनुविद्धं येन यस्मिन् प्रसूते
यदनुततमजस्रं पाति चाधिश्रितो यः ।
यदुरु महदुदर्चिर्यद्विधत्ते च गोपी
तमगृतसुखबोधज्योतिषं नौमि कृष्णम् ॥

इति क्रमदीपिकायामष्टमः पटलः ॥ समाप्ता ॥ शुभमस्तु ॥

अत्र तन्त्रे पटलेषु प्रतिपादितविषयाः—

१. देहशुद्धि- न्यास-पीठन्यासविधिः ।

२. गोपालमन्त्रोद्धारतन्न्यासविधिः ।

३. ध्यानादिपूजाविधानम् ।

४. दीक्षाविधिवर्णनम् ।

५. पुरश्चर्याविधानम् ।

६. मन्त्रविनियोगप्रदर्शनम् ।

७. काम्यप्रयोगान्तर—तन्मन्त्रभेदनिर्णयः ।

८. वश्यादिप्रयोगविधानम् ।

१४४

१००६ गन्धर्वतन्त्रम्. ।

शिवप्रोक्तम्

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णं द्विचत्वारिंशति पटलेषु विरचितसंदर्भणम् । पत्राणामत्र संख्या ११८ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २३ । पत्रसंनिवेशः १३ × ९ ३/८ ।

आरम्भः

ओं श्रीगणेशाय नमः ॥ ओं नमः परदेवतायै ॥
यं वदन्त्यमलात्मानः पुरुषं प्रकृतेः परम् ।
चिद्रूपं परमानन्दं वन्दे तं विघ्ननायकम् ॥ १ ॥
भर्तारं गुणवृद्धिशून्यमचलं गत्वाभिसारक्रमाद्
दीव्यन्ती कुलवर्त्मनैव गुणवत्यानन्दमातन्वती ।
शेते सुप्तभुजङ्गपोतकुटिला या मेरुमूले गता
सूते यन्त्रशतानि तानि मुरजिन्मुख्यानि पायादसौ ॥ २ ॥
विश्वामित्र इति ख्यातो नृपः परमधार्मिकः ।
सिद्धिं दृष्ट्वा वसिष्ठस्य तपेस्तपे सुदुश्चरम् ॥ ३ ॥
अप्राप्य तपसः सिद्धिमुदीचीं दिशमाविशत् ।
गङ्गाद्वारसमासीनं मुनिं योगपरायणम् ॥ ४ ॥

दत्तात्रेयं महाभागमभिवाद्य कृताञ्जलिः ।
उवाचेदं वचस्तस्मै विनयानतकन्धरः ॥ ५ ॥

विश्वामित्र उवाच

नाद्रा (क्ष्यं ? क्षं) सम्यगिष्ट्वापि क्रतुभिर्बहुदक्षिणैः ।
सत्पात्रे सर्वदानानि कृत्वापि मुनिसत्तम ॥ ६ ॥

महाविद्यां प्रजप्याथ पुरस्क्रियापुरःसराम् ।
भवाब्धेस्तरणोपायं तपस्तप्त्वा सुदुश्चरम् ॥ ७ ॥

सर्वागमैकतत्त्वज्ञ ब्रह्मनिष्ठ तपोधन ।
किं करिष्याम्यहं देव कुत्र यास्यामि तद्वद ॥ ८ ॥

दत्तात्रेय उवाच

मा विषीद नृपश्रेष्ठ सर्वथा त्वं स्थिरो भव ।
यत् श्रुत्वा (दि ? धि) गतं पूर्वमस्माभिर्नन्दिकेश्वरात् ॥ ५ ॥
तदशेषं प्रवक्ष्यामि गुह्याद्गुह्यतरं परम् ।

पुष्पिका

इति **श्रीगन्धर्वतन्त्रे** प्रथमः पटलः ॥ १ ॥

अन्तः

एवं विदित्वा परमात्मरूपं
गुहाशयं निष्कलमद्वितीयम् ।
समस्तसाक्षिं सदसद्विहीनं
प्रयाति शुद्धं परमात्मरूपम् ॥

य एतत्तन्त्रं समधीते सोऽग्निपूतो भवति सुरापानात्पूतो भवति कृत्याकृत्यात् पूतो भवति अगम्यगमनात्पूतो भवति ॥

इति श्रीतन्त्रगन्धर्वे द्वाचत्वारिंशत्तमः पटलः समाप्तः ॥ शुभमस्तु ॥

अथः प्रदर्श्यन्ते पटलेषु प्रतिपादिता विषयाः ।

१ तन्त्रस्य प्रस्ताविका ।
२ विद्याभेदानामुद्धारः ।
३ पञ्चमीविद्योद्धारप्रयोगादिविधिः ।
४ राजराजेश्वरीकवचम् ।

९२

६४९ घटयोगः ।

घेरण्डसंगृहीतः

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकम् असंपूर्णं नवीनं नवावस्थाकम् । पत्रसंख्या ९ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २४ । संनिवेशः १३½ × ९¾ ।

आरम्भः

श्रीगणेशाय नमः ओं

आदीश्वराय प्रणमामि तस्मै
येनोपदिष्टा हठयोगविद्या ।
विराजते प्रोन्नतराजयोग-
मारोढुमि (च्छन्विधियोग एव ? च्छोरधिरोहिणीव) ॥ १ ॥

एकदा चण्डकापालिर्गत्वा घेरण्डकुट्टिमम् ।
प्रणम्य विनयाद्भक्त्या घेरण्डं परिपृच्छति ॥ २ ॥

श्रीचण्डकापालिक उवाच

घटस्थयोगं योगेश तत्त्वज्ञानस्य कारणम् ।
इदानीं श्रोतुमिच्छामि योगेश्वर वद प्रभोः ॥ ३ ॥

श्रीघेरण्ड उवाच

साधु साधु महाबाहो यन्मां त्वं परिपृच्छसि ।
कथयामि हि ते वत्स सावधानोऽवधारय ॥ ४ ॥

नास्ति मायासमं पाशं नास्ति योगात्परं बलम् ।
नास्ति ज्ञानात्परो बन्धुर्नाहंकारात्परो रिपुः ॥ ५ ॥
अभ्यासात् कादिवर्णानि यथा शास्त्राणि बोधयेत् ।
तथा योगं समासाद्य तत्त्वज्ञानं च लभ्यते ॥ ६ ॥
सुकृतैर्दुष्कृतैः कार्यैर्जायते प्राणिनां घटः ।
घटादुत्पद्यते कर्म घटयन्त्रं यथा भ्रमेत् ॥ ७ ॥
ऊर्ध्वाधो भ्रमते यद्वद् घटियन्त्रं गवां वशात् ।
तद्वत्कर्मवशाज्जीवो भ्रमते जन्ममृत्युभिः ॥ ८ ॥
आमकुम्भमिवाम्भःस्थो जीर्यमाणः सदा घटः ।
योगानलेन संदह्य घटशुद्धिं समाचरेत् ॥ ९ ॥
प्राणापाननादबिन्दुजीवात्मपरमात्मनः ।
मिलित्वा घटते यस्मात्तस्माद् घट उच्यते ॥ १० ॥

१४८

१०२१ चीनाचारक्रमः ।

शिवप्रोक्तः

हस्तलिखितमिदं पुस्तकं देवनागराक्षरलिपिकं नूतनं नवीनावस्थाकं समग्रं षट्सु पटलेषु विरचितसंदर्भणोपन्यासम् । पत्रसंख्या ७ प्रतिपृष्ठं श्रेणिसंख्या २४—२६ । प्रतिश्रेण्यक्षर-संख्या २४ । पत्रसंनिवेशः १२$\frac{९}{१०}$ × ९$\frac{१}{२}$ ।

आरम्भः

ॐ नमः पार्वत्यै ॥ श्रीदेव्युवाच

महाचीनक्रमाचारः सूचितो न प्रकाशितः ।
इदानीं श्रोतुमिच्छामि कथयस्व महेश्वर ॥
इति पृष्टः पुरा देव्या कैलासशिखरे हरः ।
चिन्तयामास मनसा किंचिदामीलितेक्षणः ॥
इयमुत्कण्ठिता भूयोभूयः प्रेरयति प्रिया ।
चीनाचारक्रमं वक्तुं स्वप्रकाशं कथं मया ॥
अतिगुह्यतरं सोऽयमाचारः सिद्धिदायकः ।
स्त्रीणां चपलया बुद्ध्या कथं गोप्तुं हि शक्यते ॥

इति संचिन्त्य मनसा पुनराह महेश्वरी ।
चीनाचारक्रमाचारं ब्रूहि मे परमेश्वर ॥

श्रीशिव उवाच

अलं यत्नैरलं यत्नैरलं यत्नैर्महेश्वरि ।
चीनाचारक्रमं श्रोतुं विरता भव पार्वति ॥
सर्वथा परमद्वारो न प्रकाश्यः कदाचन ।

पुष्पिका

इति महाचीनाचारसारतन्त्रे सर्वाचारसारोत्तमोत्तमे **महाचीनाचारक्रमे** प्रथमः पटलः ॥ १॥

अन्तः

देया विद्यार्थिने विद्या व्याधितेभ्यश्च औषधम् ।
देयं क्षुधार्थिने अन्नं त्रयं स्वर्गस्य लक्षणम् ॥

इति महाचीनाचारसारतन्त्रे सर्वाचारसारोत्तमोत्तमे महा**चीनाचारक्रमः** समाप्तः ॥

अस्मिंस्तन्त्रे प्रतिपटलमुद्दिष्टविषया इमे ।

१ तन्त्रप्रस्तावनायां वसिष्ठमुनेर्देवीमाराधयतः सिद्ध्यलाभे शप्तुमुद्यतस्य चीनाचारक्रमेणाराधनाज्ञाकथनम् ।

२ चीनाचारोपदेशपूर्वं वसिष्ठमुनेस्तारादेव्या आराधनवर्णनम् ।

३ चीनाचारे पीठपूजन–सुराशापविमोचननिर्णयः ।

४ कुलद्रव्यनिर्माण–तत्सेवनादिनिरूपणम् ।

५ समयाष्टक–कुलाचारशङ्कापनोदनवृत्त–ग्रन्थफलोपसंहारवर्णनम् ।

६ शक्तिपूजापुष्पप्रकाशनम् ।

१५३

१०२८ तोडलतन्त्रम् ।

शिवोक्तम्

इदं पुस्तकं हस्तलिखितं देवनागराक्षरलिपिकं नवीनमजरदवस्थाकं संपूर्णं दशसूल्लासेषु विरचितसंदर्भणोपन्यासम् । पत्राणां संख्या १२ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २४–२६ । पत्रसंनिवेशः १२$\frac{9}{10}$ × ९$\frac{1}{2}$ ।

आरम्भः

ॐ श्रीदेव्युवाच

ब्रूहि मे जगतां नाथ सर्वविद्यामय प्रभो ।
महाविद्या (स्व ? सु) सर्वा (स्व ? सु) पूज्या (स्व ? सु) भुवनत्रये ॥
एतासां दक्षिणे भागे नानारूपः पिनाकधृक् ।
पृथक् पृथक् महादेव कथयस्व मयि प्रभो ॥

श्रीशिव उवाच

शृणु चार्वङ्गि सुभगे कालिकायाश्च भैरवम् ।
महाकालं दक्षिणाया दक्षभागे प्रपूजयेत् ॥

अन्तः

तारादेवी (नील ? मीन) रूपा बगला कूर्ममूर्तिका ।
धूमावती वराहः स्यात् छिन्नमस्ता नृसिंहिका ॥

....

स्वयं भगवती काली कृष्णमूर्तिः समुद्भवा ।
इति ते कथितं देव्यवतारं दशमेव हि (?) ॥
एतासां पूजनाद्देवि महादेवसमो भवेत् ।
आसां ध्यानादिकं सर्वं कथितं मे पुरस्तव ॥

पुष्पिका

इति श्री**तोडलतन्त्रे** पार्वतीशिवसंवादे दशमोल्लासः ॥ संपूर्णः ॥ ॥

अस्मिन् ग्रन्थे पटलोद्दिष्टा विषया अमी ।

१ विद्यानां दक्षतः पूज्यदेवताकीर्तनम् ।

२ लघु—ब्रह्माण्ड—तीर्थमुद्रासननिरूपणम् ।

३ महामुद्रा—कालिकामन्त्रोद्धार—तारामन्त्रादि— स्नानसंध्या—पूजापद्धति— संक्षेपार्चाप्रदर्शनम् ।

४ तारापूजाक्रमविधानम् ।

५ प्रासादमन्त्रोद्धार—पार्थिवशिवार्चनविधानवर्णनम् ।

६ कालीमन्त्रवासना—पुरश्चरण—मन्त्रचैतन्य—तारामन्त्रवासना-माहात्म्यादिप्रकाशनम् ।

७ मूलाधारस्थद्वीपाध्यादिकीर्तन— षट्चक्रदेवता—महापीठ—पातालवर्णनम् ।

८ शारीरनाडीमान—मूलाधारपद्मतन्मानादिनिर्णयः ।

९ नवार्णवासना—दीर्घायुःसाधन— षण्मालाजपफल— भूतकात्यायनीमन्त्रोद्धार— ध्यानादि-प्रकाशनम् ।

१० काकचञ्चुमुद्रा—दशावतारदेवीनिर्णयः ।

१६१

१०४३ देवीरहस्यम् ।

भैरवप्रोक्तम्

पुस्तकमेतत् हस्तलिखितं देवनागराक्षरलिपिकं नातिप्राचीनं नूतनावस्थाकं पञ्चचत्वारिंशत्पटलपर्यन्तम् असंपूर्णम् उत्तरार्धं दुर्गापञ्चाङ्गेन विकलम् । पत्रसंख्या २१७ । श्रेणयः १३ । अक्षरसंख्या २० । संनिवेशः ९$\frac{3}{8}$ × ९$\frac{3}{8}$ ।

आरम्भः

ओं श्रीगणेशाय नमः ओं नमस्त्रिपुरसुन्दर्यै श्रीर्नः ओं श्रीभैरव उवाच ओं

अधुना देवि वक्ष्यामि रहस्यं परमाद्भुतम् ।
य (त्र?न्न) सर्वेषु तन्त्रेषु यामलादिषु भाषितम् ॥
परादेवीरहस्याख्यं तन्त्रं मन्त्रार्थविग्रहम् ।
तत्त्वं श्रीषोडशाक्षर्याः सर्वस्वं मम पार्वति ॥
अप्रकाश्यमदातव्यं परमार्थफलप्रदम् ।
भोगापवर्गदं लोके साधकानां सुखावहम् ॥

पुष्पिका

इति श्रीरुद्रयामले तन्त्रे देवीरहस्ये परमार्थदीपिकायां यन्त्रशोधनविधिर्नाम पञ्चविंशः पटलः २५ इ(त्य ? ति) पूर्वार्धम् शुभम् ॥

अन्तः

इतीदं परमं स्तोत्रं महामृत्युंजज ? यप्रदम् ।
पठेद्वा पाठयेन्नित्यं सर्वस्वं देवदुर्लभम् ॥

....

चतुष्पथेऽर्धरात्रे तु ब्राह्मे वापि मुहूर्तके ।
पठित्वा कौलिको देवि भवेद्भैरवसंनिभः ॥

इतीदं मम सर्वस्वं रहस्यं परमाद्भुतम् ।
यस्य कस्य न(द्र्दे) ष्टव्यमित्याज्ञा पारमेश्वरी ॥

इति श्रीदेवीरहस्ये महामृत्युंजयस्तोत्राख्यानं नाम पञ्चचत्वारिंशः पटलः ४५
समाप्तमिदं मृत्युञ्जयपञ्चाङ्गम् अतः परं दुर्गापञ्चाङ्गम् ॥

अस्मिन् ग्रन्थे पटलेषु प्रतिपाद्यविषया अधः प्रदर्श्यन्ते ।

× × × × ×

५

११२ बालबोधिनी वृत्तिः ।

जगद्धरभट्टविरचिता

इदं भूर्जपत्रात्मकं हस्तलिखितं पुस्तकं शारदाक्षरलिपिकम् अतिजरदवस्थम् अतीवप्राचीनम्। आदितः ६३ पत्राणि विनष्टानि, अन्तेऽपि विनष्टाल्पभागशेषकम् । प्रायशोऽखण्डितात्रुटित-विद्यमानग्रन्थभागस्य पत्रसंख्या द्विशतोत्तरा । प्रतिपृष्ठं श्रेणिसंख्या १९ । प्रतिश्रेण्यक्षरसंख्य १९–२४ । ग्रन्थसंनिवेशः $१०\frac{३}{८} \times ८\frac{१}{२}$ ।

आरम्भः

....

परमश्चासौ.........रिति कर्मधारयः ॥ भ्रूधातुवत् ॥ भ्रूशब्दो धातुवद्भवति । स्वरे परे । यथा धातोरुवादेश उक्तः तथा भ्रूशब्दस्यापि भवतीत्यर्थः । भ्रुवौ भ्रुवः स्वरे इति किम् भ्रूभ्यां भ्रूभिः ॥ स्त्री च ॥ स्त्रीशब्दो धातुवद्भवति स्वरे परे ।

पुष्पिका

इति पण्डित**जगद्धर**विरचितायां **बालबोधिन्यां** नामप्रकरणे युष्मत्पादस्तृतीयः ॥

इति पण्डितभट्ट**जगद्धर**विरचितायां **बालबोधिन्यां** कृतौ कृत्प्रकरणे कर्माणि पादस्तृतीयः ॥

अन्तः

चेक्रीयितान्तानां यजिजपिदन्शिवदाम् ^ यज देवता. । जप मानसे । दन्श दशने । वद व्यक्तायां वाचि । एषां चेक्रीयितान्तानां तच्छीलादौ कर्तरि ऊक–प्रत्ययो भवति अत्यर्थं यजति तच्छीलः यायजूकः गर्हितं जपति तच्छीलः जञ्जपूकः.... ....

....

१६६

१०५८ बृहन्नीलतन्त्रम् ।

महाकालभैरवप्रोक्तम्

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णं नवसंख्येषु पटलेषु प्रारब्धसंदर्भणम् । पत्रसंख्या ४६ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २२ । पत्रसंनिवेशः $१३ \times ९\frac{३}{८}$ ।

आरम्भः

ओं श्रीगणेशाय नमः ॥ ओं नमस्तारायै ॥
कैलासशिखरासीनं भैरवं कालसंज्ञितम् ।
प्रोवाच सादरं देवी तस्य वक्षःसमाश्रिता ॥ १ ॥
पुरा प्रतिश्रुतं देव कालीतन्त्रप्रकाशने ।
नीलतन्त्रप्रकाशाय तद्वदस्व सदाशिव ॥ २ ॥
यस्य विज्ञानमात्रेण विजयी भुवि जायते ।
यज्ज्ञात्वा साधकाः सर्वे विचरन्ति यथा तथा ॥ ३ ॥
यस्य विज्ञानमात्रेण कविता चित्तमोदिनी ।
जायते च महादेव तत्त्वं तत्कथयस्व मे ॥ ४ ॥

श्रीमहाकालभैरव उवाच

शृणु साध्वि वरारोहे सर्वार्थस्य प्रदायिनि ।
तत्त्वं तत्कथयिष्यामि तव स्नेहाद्गणाधिपे ॥ ५ ॥

पुष्पिका

इति श्रीबृहन्नीलतन्त्रे प्रथमः पटलः ॥ १ ॥

अन्तः

ब्रह्माणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम् ।
महाशवाः प्रशस्त(ा)ः स्युः प्रधानं साधयेत् प्रिये ॥
श्मशानेऽपि पुरश्चर्या कथिता भुवि दुर्लभा ।
श्मशानसाधनं देवि परं साधनमुत्तमम् ॥
श्मशानस्थो यदि भवेज्जपेन्मन्त्रमनन्यधीः ।
स सर्वसाधनं कृत्वा देवीलोके महीयते ॥

इति श्रीबृहन्नीलतन्त्रे भैरवपार्वतीसंवादे नवमः पटलः ॥

अस्मिन् ग्रन्थे पटलोद्दिष्टविषया निम्नप्रदर्शिताः ।

१ मूलमन्त्रोद्धारपूर्वं संध्याविधिः ।

२ षोडशोपचारपूजा- स्तोत्रादिनिरूपणम् ।

३ दीक्षाविधिः

४ पुरश्चर्याविधिप्रदर्शनम् ।

५ नैमित्तिकार्चन—पीठतद्दीश्वरीवर्णनम् ।

६ कुलपूजाशाक्ताचारविधिः ।

७ निग्रहादिप्रयोग—कुमारीपूजाक्रमः ।

८ यन्त्रमन्त्रातरप्रयोग—तत्संस्कारादिविधिः ।

९ वीरसाधनविधानम् ।

११

१९२ भक्तिरसामृतसिन्धुः ।

×

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नूतनावस्थाकं संपूर्णं प्राचीनात् श्रीरघुनाथमन्दिरपुस्तकालयस्थात् संवत् विक्रमे १४६२ विरचितात् ग्रंथादवतारितम् सवत् वि० १९४५ । चतुर्भिः पूर्वादिविभागैः सलहरिभिर्विरचितसंदर्भोपन्यासम् । पत्राणां संख्या १६० । प्रतिपृष्ठं श्रेणिसंख्या ९ । प्रतिश्रेण्यक्षरसंख्या ३२—३४ । पत्रसंनिवेशः १२$\frac{1}{2}$×७ ।

आरम्भः

ओं श्रीकृष्णायनमः ओं

अखिलरसामृतमूर्तिः प्रसृमररुद्धत.कापालिः (?) ।
कलितश्यामाललितो राधाप्रेयान् विधुर्जयति ॥ १ ॥
हृदि यस्य प्रेरणया प्रवर्तितोऽहं वराकरूपोऽपि ।
तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ॥ २ ॥
विश्राममन्दिरतया तस्य सनातनतनोर्मदीशस्य ।
भक्तिरसामृतसिन्धुर्भवतु सदायं प्रमोदाय ॥ ३ ॥
भक्तिरसामृतसिन्धौ चरतः परिभूतकालजालभियः ।
भक्तमकरानशीलितमुक्तिनदीकान्नमस्यामि ॥ ४ ॥
मीमांसकवडवाग्नेः कठिनामपि कुण्ठयन्नसौ जिह्वाम् ।
स्फुर (त?तु) सनातनः सुचिरं नवभक्तिरसामृताम्भोधिः ॥ ५ ॥
भक्तिरसस्य प्रस्तुतिरखिलजगन्मङ्गलप्रसङ्गस्य ।
अज्ञेनापि मयास्य क्रियते सुहृदां प्रमोदाय ॥ ६ ॥
एतस्य भगवद्भक्तिरसामृतपयोनिधेः ।
चत्वारः खलु वक्ष्यन्ते भागाः पूर्वादयः क्रमात् ॥ ७ ॥

पुष्पिका

इति श्रीभक्तिरसामृतसिन्धौ रसोपयोगिस्थायिभावोपपादनो नाम पूर्वो विभागः ॥

अन्तः

तथाहि

भावाः सर्वे तदाभासा रसाभासाश्च केचन ।
अमी प्रोक्ता रसाभिज्ञैः सर्वेऽपि रसनाद्रसा (ः) ॥ ४१ ॥
भारत्याद्याश्चतस्रस्तु रसावस्थानसूचिकाः ।
वृत्तयो नाट्यमातृत्वादुक्ता नाटकलक्षणे ॥ ४२ ॥

इति श्रीभक्तिरसामृतसिन्धावुत्तरविभागे गौणभक्तिरसादिनिरूपणे रसाभासलहरी नवमी ॥ ९ ॥

ग्रन्थस्य गौरवभयादस्या भक्तिरसश्रियः ।
समाहृतिः समासेन मया सेयं विनिर्मिता ॥ १ ॥
गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी ।
तुष्यतु सनात्मास्मिन्नुत्तरभागे रसामृताब्धेः ॥ २ ॥

इति श्रीभक्तिरसामृतसिन्धौ गौणभक्तिरसादिनिरूपणं नाम चतुर्थोत्तरविभागः ॥ समाप्तोऽयं भक्तिरसामृतसिन्धुरिति ॥ ॥ शुभम् ॥ ये पुस्तक संवत् १४६३ का जेठा पुस्तक श्रीरघुनाथजीके मंदिर मै था उस का उतारा है संवत् १९४९ कार्तिक ॰ २९ लिखीगया लिख्या बालकरामने ॥

२७

३४२ महार्णवनिबन्धः ।

मान्धातृनृपकारितः

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नवावस्थम् असंपूर्णम् । पत्रसंख्या ३९२ । प्रतिपृष्ठं श्रेणिसंख्या १६ । प्रतिश्रेण्यक्षरसंख्या १६ । पत्रसंनिवेशः १४$\frac{1}{2}$×१० ।

आरम्भः

ओं श्रीगणेशायनमः ओं नमः सरस्वत्यै ओं

नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥

प्रवालाद्रिप्रस्थद्युतिनिचयपर्यायवपुषे
नमो विघ्नश्रेणीविघटनपटिष्ठाय महसे ।
जगत्प्रादुर्भावस्थितिलयनिरायासरचना-
विनोदासक्ताय प्रणतिफलसिद्धिप्रतिभुवे ॥

यदिन्दिरानाथपुरन्दराद्यै-
राराधितं भक्तिभरानताङ्गैः ।
श्रीचण्डिकायाश्चरणद्वयं तत्
स्वाभीष्टसिद्ध्यै भवतात्सुखं नः ॥

प्रकृष्टचलकुण्डलस्तबकघृष्टगण्डस्थलं
महार्हमणिमेखलं मरकताङ्कुरश्यामलम् ।
करोतु कमलामलं कलितपञ्चषाब्दक्रमं
महः किमपि मोहनं कपटशैशवं कैशवम् ॥

कान्ते कृतागसि रुषा परुषं ब्रुवाणा
कुण्ठीकृताथ रसभावनियन्त्रणेन ।
मौनेन मानमधिगच्छति या ददातु
सा पार्वती ह(रि?र)विभक्ततनुः श्रियं वः ॥

आसीदसीमगुण एककुलाम्बुराशा-
वुद्यत्प्रतापशुभकीर्तिघनप्रकाशः ।
लोकैः सदा हृदि धृतो गुणसंनिविष्टः
श्रीरत्न (मा?पा) लनृपतिर्भुवनैकरत्नम् ॥

तस्यात्मजो भरहपाल इति प्रसिद्धः
सिद्धाङ्गनाजनसमाजसमिद्धकीर्तिः ।
दानेन यः सुकृतिनां क्षिपति (सु?स्म) दैन्यं
सैन्यं च वैन्यसदृशः प्रतिभूपतीनाम् ॥

सुतोऽस्य जातः सुकृतोन्नतस्य
न तस्य कश्चित् सदृशो बभूव ।
यमाह्वयत् सम्यगवेक्ष्य तातो
नाम्ना हरिश्चन्द्र इति प्रतीतम् ॥

तस्यात्मजोऽभूदतुलप्रतापः
साधारणो भूमिपतिर्वदान्यः ।
अभूतपूर्वां जगतीश्वराणा-
मजीगमद्यो जगति स्वकीर्तिम् ॥

बन्धच्छिदा विषदकीर्तिमिहान्वितार्था
कृत्वा तथैव च परत्र विधातुमिच्छुः ।
कीनाशपाशचयबन्धविमोचनार्थं
तीर्थत्रयीकरविमुक्तिमचीकरद्यः ॥

तस्यात्मजः श्रीमदनेन नाम्ना
धाम्ना च रूपेण च संगतार्थः ।
रोषारुणे चक्षुषि यद्विपक्षो
नितान्तकान्तारसमाश्रितोऽभूत् ॥

यः कूपानारामान् धर्मायतनानि सन्निबन्धांश्च ।
कृत्वा स्वकीर्तिमेकामदीदृशन्मूर्तिभेदेन ॥

परिशीलयता कलाकलापं
विदधानेन च भूरिशः प्रबन्धान् ।
मदनेन महीभृताथ येन
प्रथिता नूतनभोजराजकीर्तिः ॥

पुत्रेषु सत्स्वपि कलाकुशलेषु पुत्रौ
तस्माज्जगत्त्रयविसृत्वरकीर्तिपूरौ ।
जातौ प्रियावतितरां प्रथमप्रसूतौ
नीतौ महोन्नतिमनल्पगुणैर्विनीतौ ॥

उदारशीलौ सुमनोविकाश-
मनोज्ञवृन्दावनकेलिलोलौ ।
यशोदयावेष्टितमङ्गलाङ्गौ
यौ रामकृष्णाविव संप्रतीतौ ॥

यच्छैशवानुकरणं न युवा न वृद्धः
शक्नोति कर्तुमपरः श्रितसद्गुणोऽपि ।

दानं निदानमखिलार्थिजनार्थसिद्धेः
कीर्तिर्दिगन्तविरता च यतस्तदीया ॥
अप्रतिमल्लः पृथ्व्यां पृथ्वीमल्लस्तयोरभूज्ज्येष्ठः ।
अपरो मान्धातृगुणैर्मान्धाता गीयते जगति ॥
सोऽयं सुकृतविधाता रिपुजेता संतनोति मांधाता ।
विद्वन्मुखेन मतिमान् सत्कृति(तं?त्नं) महार्णवं नाम ॥
श्रुतिस्मृतिपुराणानि समालोच्य यथामति ।
विरच्यते समासेन निबन्धोऽयं महार्णवः ॥

तत्र तावद्वक्ष्यमाणसकलकर्मोपयोगित्वेन कर्मविपाकरूपरोगादिनिवृत्त्यर्थं प्रायश्चित्तादेरवश्यकर्तव्यता प्रतिपाद्यते । तद्यथा ' ब्रह्महा क्षयरोगी स्यात् ' इत्यादि रोगनिदानकथनात् निदानोच्छेदेन च व्याधिनिवृत्तेरवगतत्वात् तन्निदानोच्छेदाय क्षयित्वादिलक्षणरोगमुक्तेर्द्वादशवार्षिकादिप्रायश्चित्तव्याधिप्रतिकृतिदानादि कर्तव्यम् ।

पुष्पिका

महार्णवाख्ये महिते प्रबन्धे
मान्धातृनाम्नो मदनात्मजस्य ।
सत्कर्मरत्नौघनिधानमाद्य-
स्तुङ्गस्तरङ्गोऽयमगादगाधः ॥

अन्तः

ब्राह्मणोद्वाहनं चैव कर्तव्यं तेन शुद्ध्यतीति ब्राह्मणोद्वाहनस्यैव पापविमुक्तिहेतुत्वाभिधनादेतत् स्वतन्त्रतया निष्कृतिः तेन शुद्ध्यतीति काकाक्षिवदुभयत्र संबध्यते अतः श्रवणं हरिवंशस्य.................... ॥

१६८

१०६८ मातृकाभेदतन्त्रम् ।

शिवोक्तम्

इदं हस्तलिखितं पुस्तकं देवनागराक्षरलिपिकं नवीनं नवावस्थाकं संपूर्णं षोडशभिः पटलैः कृतसंदर्भविभागम् । पत्रसंख्या १९ । प्रतिपृष्ठं श्रेणिसंख्या २४ । प्रतिश्रेण्यक्षरसंख्या २४ । पत्रसंनिवेशः १२$\frac{१}{२}$ × ९$\frac{१}{४}$

आरम्भः

ओं नमो(?)श्रीगणेशाय नमः ओं नमो दुर्गायै

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
पप्रच्छ परया भक्त्या भैरवं परमेश्वरम् ॥

चण्डिकोवाच

त्रिपुरापूजनं नाथ स्वर्णरत्नैर्विभूषणैः ।
कलिकाले स्वर्णरत्नं तत्प्रभावं(?) तथा मणिः ॥
केनोपायेन देवे(शि?श) स्वर्णरत्नादि लभ्यते ।
तद्वदस्व विशेषेण यथा रत्नादिकं भवेत् ॥

अन्तः

